# त्रुटिविश्लेषणम्

**डॉ.मनमोहनशर्मा**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
manmohanshrma400@gmail.com

**सारांशः**

*'त्रुटिः' अध्यापकानां कृते समस्या न अपितु अवसररूपा एका महत्त्वपूर्णा सामग्री इति । आरम्भे त्रुटिविश्लेषणं व्यतिरेकीविश्लेषणस्य प्रक्रियायाः अङ्गत्वेन स्वीकृतं परन्तु भाषाधिगमप्रक्रियायां अस्य स्थानम् अधिकं प्रमुखं स्वतन्त्रं च अस्ति । भाषाध्ययने त्रुटिषु नियन्त्रणम् आवश्यकम् अस्ति । अनया पद्धत्या छात्राः भाषायाः मानकीकरणम्, व्याकरणिक-नियमावल्योल्लेखः, कोशः एवं परिभाषित-शब्दावल्याः निर्माणादीनां ज्ञानं प्राप्तुं शक्नुवन्ति ।*

## प्रस्तावना

भाषा भावाभिव्यक्तेः एकं साधनमस्ति । स्वविचारान् स्पष्टरूपेण प्रभाविरूपेण च अभिव्यक्तं कर्तुं भाषणे उच्चारणगत-स्पष्टता व्याकरणिक-शुद्धता वा अनिवार्या भवति । अतएव भाषाधिगम-काले भाषाकौशलानाम् स्पष्टावधानं भवेत् । भाषायाः संरचना-कारणाद् भाषायां समानानाम् असमानानां च तत्त्वानाम् उपस्थितिः स्वाभाविकी एव । एतानि तत्त्वानि भाषाधिगमे बाधां जनयन्ति । एतासां बाधानां निवारणार्थं भाषाशिक्षणे नैकाः विधयः विकसिताः यैः भाषाधिगमने सारल्यं भवति । एतस्य कृते प्रयुक्ताः अनेके उपागमाः विधयः वा सन्ति । एतेषु एव त्रुटि-विश्लेषणम् अन्यतममम् अस्ति ।

## त्रुटि-विश्लेषणस्य विकासः

भाषाशिक्षणसन्दर्भे त्रुटि-विश्लेषण-पद्धतेः विकासः व्यतिरेकी-विश्लेषणस्य सन्दर्भे जातः । यत्र प्रथमभाषासंरचनायाः प्रभावस्य अध्ययनं द्वितीयभाषाधिगमसन्दर्भे क्रियते, भाषाधिगमगत-बाधानां पूर्वानुमानं च विधीयते सा व्यतिरेकी-विश्लेषणपद्धतिः भवति । आरम्भे त्रुटिविश्लेषणं व्यतिरेकीविश्लेषणस्य प्रक्रियायाः अङ्गत्वेन स्वीकृतं परन्तु भाषाधिगमप्रक्रियायां अस्य स्थानम् अधिकं प्रमुखं स्वतन्त्रं च अस्ति ।

## त्रुटि-विश्लेषणस्य वैशिष्ट्यम्

त्रुटेः विश्लेषणम् एका भाषावैज्ञानिकी प्रक्रिया वर्तते । यत्र अध्येतृभिः क्रियमाणानां त्रुटीनां विस्तृताध्ययनं विधाय त्रुटीनाम् एकस्य सुस्पष्टस्य प्रारूपनिर्धारणं क्रियते, तदनु त्रुटीनां प्रारूपाधारेण त्रुटीनां कारणान्वेषणं कृत्वा कारणस्य विश्लेषणं विधीयते । अन्ते च उपचारात्मकप्रक्रियायाः निर्धारणं कृत्वा त्रुटिसंशोधनं क्रियते ।





## भाषाधिगमने त्रुटेः कारणानि -

भाषायां त्रुटेः बहुविधानि कारणानि भवितुमर्हन्ति परन्तु प्रायः अत्यन्तप्रमुखरूपेण कारणत्रयमेव भवति।

- मातृभाषायाः व्याघातः अथवा प्रभावः।
- भाषायाः संरचनात्मक-काठिन्यम्।
- भाषायाः आधारभूत-भाषिकतत्त्वानां ज्ञानाभावः।


अन्यभाषाधिगन्तॄणां छात्राणां भाषायां मातृभाषायाः स्पष्ट-प्रभावः दृश्यते । यतो हि शिक्षार्थिनः अन्यभाषायाः ध्वनीन् मातृभाषायाः ध्वनीनां सन्दर्भे गृह्णन्ति। भाषा-संरचनायाः भिन्नायां सत्याम् अन्यभाषाधिगन्तारः छात्राः भाषायाः केषुचित् स्तरेषु अधिकारं प्राप्तुम् असमर्थाः भवन्ति । उपयुक्त-शिक्षण-सामग्र्याः अथवा शिक्षकाणाम् अभावेन प्रभावेण वा छात्राणां भाषायाम् उच्चारणगताः अशुद्धयः भवन्ति। छात्राणाम् अस्वस्थ-मानसिक-स्थितेः कारणेनापि नैकाः त्रुटयः जायन्ते। भाषायाः आधारभूत-भाषिकतत्त्वानां ज्ञानाभावादपि भाषायां विभिन्नस्तरेषु त्रुटयः भवन्ति।




नियन्त्रितेन अश्वेन अश्वारोहण-शिक्षणं सरलतया शक्यं परन्तु अश्वारोहणे काः काः समस्याः भवन्ति, तासां समाधानं


कथं वा करणीयम् इति सर्वमपि अनियन्त्रितम् अश्वमारुह्य एव ज्ञातुं शक्यते अत्र अनियन्त्रितः अश्वः अश्वारोहण-शिक्षणे साधनम् अस्ति । इदं कथनं छात्र-कृत-त्रुटिभिः सम्बद्धं वर्तते । छात्र-कृत-त्रुटिः अनियन्त्रित-अश्व-सदृशी भवति यस्याः नियन्त्रणेन अध्यापकाः शिक्षण-कला-निष्णाताः भवितुं शक्नुवन्ति। परन्तु त्रुटेः साधनरूपेण प्रयोगः त्रुटि- विश्लेषणानन्तरमेव कर्तुं शक्यते।

मातृभाषेतर-भाषाणां शिक्षणे विविधेषु स्तरेषु त्रुटीनां समाधानाय त्रुटि-विश्लेषण-पद्धतिः महती उपयोगिनी वर्तते। अतएव सर्वैरपि विद्वद्भिः यस्याः माहात्म्यम् अङ्गीक्रियते, विदुषां कथनमस्ति यत् भाषा-अधिगमे याः त्रुटयः भवन्ति ताः भाषा-शिक्षण-प्रक्रियायाः विषये महत्त्वपूर्णाः सूचनाः यच्छन्ति।




ताश्च सूचनाः भविष्य-काले अध्येतॄणां कृते भविष्यवाणीं करोति । अतः तासां त्रुटीनां सम्यग् विश्लेषणं कृत्वा अध्यापकैः पाठ्यक्रमस्य, शिक्षण-विधीनाम्, शैक्षिक-गतिविधीनाम्, सहायक-सामग्रीणाम् , मूल्याङ्कन-पद्धतीनां च निर्धारणं करणीयम्।

अस्मिन् सन्दर्भे त्रुटि-विश्लेषणं संस्कृताध्यापकानां कृते महते उपयोगाय भवितुमर्हति। भारते प्रायः प्रत्येकस्मिन् प्रान्ते संस्कृतस्य अध्ययनमध्यापनं भवति अतः संस्कृतच्छात्राः भाषायाः विविध-स्तरेषु त्रुटीः कुर्वन्ति ताः त्रुटयः संस्कृत-शिक्षणस्य विविध-स्तरेषु साधनरूपेण उपयोगिन्यः भविष्यन्ति। एतासां त्रुटीनां सम्यग् अध्ययनं कृत्वा समुचित-सामग्रीणां निर्माणं कृत्वा यस्य छात्रस्य यादृशी त्रुटिः आसीत् तस्मै तादृशी सामग्री दातुं शक्यते। अनेन संस्कृत-भाषायाः अधिगमेन सम्बद्धाः समस्याः दूरी भविष्यन्ति।



छात्र-कृत-त्रुटिः एतादृशं महत्त्वपूर्णं प्रमाणं भवति, येन अध्येतॄणाम् अधिगम-प्रक्रियायाः विभिन्नानां पक्षाणां परिचयः दीयते यथा अध्येता केन क्रमेण अधिगच्छति, कुत्र सरलतया अधिगच्छति, कुत्र च अधिगमे काठिन्यमनुभवतीति एवं प्रकारेण छात्र-कृत-त्रुटयः भाषा-अधिगम-प्रक्रियायाः तथा अध्येतॄणां विभिन्न-पक्षाणां विधीनाम् अधिगम-प्रारूपाणाञ्च व्यापकं परिचयं प्रयच्छन्ति शिक्षण-योजनायाः निर्माणे च सन्मार्गदर्शनं कुर्वन्ति । अतः छात्र-कृत-त्रुटीनां साधनरूपेण यथाक्रमं प्रयोगं कृत्वा विविध-गतिविधयः नूतन-परियोजनाश्च निर्मातुं शक्यन्ते। संस्कृत-भाषा-शिक्षणम् इतोऽपि प्रभावि सफलं च भवितुमर्हति।




एडवर्ड थॉनडाइक-महोदयः प्रसिद्धः मनोवैज्ञानिकः अधिगमस्य एकं सिद्धान्तं प्रतिपादितवान् **त्रुटिः एवं प्रयासः (Trial and error Method)** इति। तस्य चिन्तनम् आसीत् यत् त्रुटयः अधिगमे साहाय्यं कुर्वन्ति यदि तासां समाधाने प्रयासस्य नैरन्तर्यं भवेत्।

अधिगमस्य प्रक्रियायां त्रुटयः अधिगमाय गतिविधयः भवन्ति। केनापि उक्तं यत् त्रुटयः व्यक्तेः प्रशिक्षणस्य कार्यं कुर्वन्ति। छात्राः प्रतिदिनम् अधिगम-प्रक्रियया तथा पाठ्यसामग्र्या सम्बद्धाः त्रुटीः कुर्वन्ति। शिक्षकेभ्यः एतासां त्रुटीनाम् अवधानपूर्वकं सूची करणीया । तासां त्रुटीनाम् अपेक्षानुगुणं व्यक्तिगतरूपेण सामूहिकरूपेण वा विश्लेषणं कृत्वा निदानम् अर्थात् त्रुटीनां कारणान्वेषणं कृत्वा तासां त्रुटीनां सर्वविधं समाधानार्थम् उपचारस्य योजना कर्तव्या।

त्रुटीनां ज्ञानम्, तासां विश्लेषणम्, निदानम्, उपचारः इति एषा प्रक्रिया अधिगमार्थं साधनस्य कार्यं करोति। त्रुटयः असफलतां द्योतयन्ति असफलतया च निष्ठापूर्वकाभ्यासस्य प्रयत्नस्य च प्रेरणा प्राप्यते।

## त्रुटीनां विश्लेषणे अध्यापकानां लाभः -

त्रुटीनां विश्लेषणे तासां समाधानाय समुचित-गतिविधीनाम्, अभ्यासानाम्, पाठ्यक्रमस्य, शिक्षण-विधीनां प्रविधीनां निर्माणे चयने च अध्ययन-पूर्वकः परिश्रमः सम्मिलितः भवति, येन अध्यापकस्य शिक्षणे नैपुण्यं प्रावीण्यं परिशोधनञ्च भवति।

## अवसररूपेण त्रुटयः -

**अत्र मुख्यः प्रश्नः 'केषां कृते? स्पष्टमेव अध्यापकानां कृते' ।** 'छात्राणां त्रुटयः अध्यापकेभ्यः समस्याः भवन्ति' इति चिन्तनेन अध्यापकानां शिक्षणं प्रभावितं भवति, यतो हि बहुधा ते तासां समाधाने अशक्ताः भवन्ति। समाधानाभावे छात्राणां सम्पूर्णव्यक्तित्वं विकृतं जायते। त्रुटिसन्दर्भे प्रायः 'त्रुटिः' इत्यनेन पदेन नकारात्मकः भावः एव ज्ञायते, परं 'त्रुटि-विश्लेषणसन्दर्भे' 'त्रुटिः' अध्यापकानां कृते समस्या न अपितु अवसररूपा एका महत्त्वपूर्णा सामग्री इति।

## त्रुटयः अध्यापकेभ्यः अवसराः एव –

- स्वशिक्षणस्य विश्लेषणं कर्तुम्।
- छात्राणां स्तराभिज्ञातुम्।
- पाठ्यवस्तुनः निर्धारणं कर्तुम्।

- समुचितशिक्षणशैल्याः विधेः च चयनं कर्तुम् ।
- समुचितशिक्षण-सामग्र्याः निर्धारणं कर्तुम् ।
- कक्ष्यायाम् अपेक्षित-वातारणं निर्मातुम् ।
- वैयक्तिकरूपेण अनुदेशनात्मकशिक्षणस्य स्वरूपं निर्धारयितुम् ।
- त्रुटि-विश्लेषणेन निदानात्मकं कार्यं कर्तुम् ।
- उपचारात्मक-प्रक्रियायाः निर्धारणार्थम् ।

**एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति – (महाभा.६/१/८४)**

इदं श्रुतिवाक्यं शब्दानां सम्यग्ज्ञानं तेषां शास्त्रसम्मतं प्रयोगश्च इहलोके दिव्यलोके च सर्वसाधकः भवति इति वदति । अनेन अनुमातुं शक्यते यत् कस्यांश्चिदपि भाषायां शब्दानां शुद्धं ज्ञानं प्रयोगश्च अत्यन्त-महत्त्वपूर्णः भवति विशिष्य संस्कृत-भाषायाम् । अत एव शब्दानां साधुत्वम् असाधुत्वञ्च निर्णेतुं नैकाः प्रौढग्रन्थाः संस्कृतसाहित्ये वर्तन्ते ।

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। (वा.ब्र.१)**

वाक्यपदीयस्य अयं श्लोकः शब्दः एव ब्रह्मस्वरूपः इति बोधयति । **'ते मृत्युमतिवर्तन्ते,ये वै वाचमुपासते'** इत्यनया श्रुत्या वाग्देव्या उपासनया मृत्युञ्जयं फलं बोधितमस्ति । उत्तररामचरिते भवभूतिना अपि निगदितम् यत् - **'वन्देमहि च तां वाणीममृतामात्मनः'** तदर्थमेव कदाचित् शास्त्रेषु प्रायः शब्दापशब्दविमर्शः विस्तरेण वर्तते ।

**शब्दानामेव या शक्तिः तर्को यः पुरुषाश्रयः ।**
**शब्दाननुगतो न्यायोऽनागमेष्वनिबन्धनः ।। (वा.ब्र.१२८)**

मानवेषु वाक्यभेदादिज्ञानात्मिका या तर्कशक्तिः भवति सा शब्दसामर्थ्यमेव वर्तते । अनेन इदम् वक्तुं शक्यते यत् साधुशब्दानां ज्ञानं प्रबलायाः तर्कशक्तेः साधनं भवति तथैव अपशब्दानाम् अथवा असाधु-शब्दानां ज्ञानं तर्कशक्तेः ह्रासस्य कारणं भवितुमर्हति । अर्थात् काचन व्यक्तिः अतिप्रबुद्धा तर्हि साधुशब्दज्ञानं तत्र कारणं न तु व्यक्तिरिति, तथैव तर्कशक्तेः ह्रासकारणात् या मन्दता मानवेषु जायते असाधुशब्दाः अथवा साधुशब्दानां ज्ञानाभावः तत्र कारणमिति ।

**यथैषां तत्र सामर्थ्यं धर्मेऽप्येवं प्रतीयताम् ।**
**साधूनां साधुभिस्तस्माद्वाच्यमभ्युदयार्थिनाम् ।। (वा.ब्र.१३०)**

यथा शब्दानां विभिन्नेषु तत्तत्कार्येषु सामर्थ्यं भवति तथैव साधुशब्दानां प्रयोगे अभ्युदयस्य धर्मस्य वा सामर्थ्यम् भवति । अतः अभ्युदयेच्छुकैः साधुशब्दानामेव प्रयोगः करणीयः ।

**शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते ।**
**तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम् ।। (वा.ब्र.१३८)**

सास्ना-लाङ्गूल-ककुद-खुर-विषाणयुक्तस्य 'गौः' इति शब्दस्य प्रयोगेच्छुकाः शब्दसंस्काराभावात् 'गावी' इत्यादीनां प्रयोगं कुर्वन्ति। भाषाज्ञैः ते अपभ्रंशशब्दाः अपशब्दाः वा कथ्यन्ते इति । असाधुशब्दानां प्रयोगे शब्दसंस्कारस्य अभावः कारणमिति वक्तुं शक्यते। भाषायाः 'श्रवण-भाषण-पठन-लेखन' इत्यादिषु चतुर्षु स्तरेषु असाधुशब्दानां प्रयोगः आधुनिकपरिदृश्ये 'त्रुटिः' कथ्यते । यदि अध्यापकैः इदं ज्ञातुं शक्येत यत् त्रुटेः स्थानम् अर्थात् कारणं किम् अस्ति तर्हि त्रुटेः समूलं निवारणं कर्तुं शक्यते । अध्ययनपत्रेऽस्मिन् त्रुटीनां सम्भावित-स्थलानां किञ्चित् विवरणं क्रियते ।

## ❖ संस्कृते त्रुटीनां सम्भावित-स्थलानि -

- अस्पष्टवर्ण-ज्ञानम् ।
- अस्पष्टवर्णविन्यास-ज्ञानम् ।
- मात्रा-भ्रमः ।
- अस्पष्टसन्धियुक्तवर्णोच्चारणम् ।
- अशुद्धसन्धियुक्तपदानां लेखनम् ।
- मूलशब्दज्ञाने भ्रमः ।
- समानविभक्तिवचनकारकनिर्धारणे दोषः।
- णकार - नकारयोः निर्धारणम् ।
- सर्वनामशब्दप्रयोगदोषः ।
- समानसर्वनामशब्दभ्रमः ।
- विशिष्टशब्दरूपाणां प्रयोगभ्रमः।
- कारकनिर्धारणदोषः।
- उपपदविभक्तिसम्बद्धदोषः ।
- क्रियापदसम्बद्धदोषाः ।
- अव्ययपदेषु भ्रमः।
- प्रत्ययसम्बद्धदोषः।
- विशेष्यविशेषणनिर्धारणे-दोषः।
- समानविभक्तिप्रयोगे दोषः।
- लिङ्गप्रयोगे दोषः।
- वचनप्रयोगे दोषः।
- पुरुषप्रयोगे दोषः ।
- कालनिर्धारणदोषः ।
- लकारप्रयोगे दोषः ।

## ❖ सम्भावितानां त्रुटीनाम् उदाहरणानि -

- अस्पष्टवर्ण-ज्ञानम् - **(अ-आ,इ-ई,उ-ऊ,ओ-औ, थ-ध,ड-ङ,छ क्ष,स,श,ष... )**
- अस्पष्टवर्णविन्यासविच्छेद-ज्ञानम् - **(उपन्यासः - उ-प्-अ-न्-अ-य्-अ-स्-अ । स्-अ-र्-प्-अ - सप्र )**

- मात्रा-भ्रमः - (इ,ई - बुद्धी,पक्षि । उ,ऊ- मरूत्,रुपम् । ए,ऐ - मैरु,मेत्री । ओ-औ, ऋ-ॠ )
- अस्पष्टसन्धियुक्तवर्णोच्चारणम् - (अत्योत्तमम् - अतयोतम्, वध्वागनम् - वध्वाआगनम् , पित्रादेशः - पितरादेशः..)
- अशुद्धसन्धियुक्तपदानां लेखनम् - (देवेन्द्रः - देवैन्द्रः,महौषधिः -महोषधिः,पितॄणाम्- पितर्णिम् ,पित्रादेशः - पितरादेशः)
- मूलशब्दज्ञाने भ्रमः - (हरि - हरी, पत्नी - पत्नि, गो - गौ, सखि - सखी, मनस्-मन.......)
- समानविभक्तिवचनकारकनिर्धारणे दोषः - (रामौ प्र.द्वि., रामौ द्वि.द्वि., भवतः द्वि.ब.,प.ए.,ष.ए.,.......भ्याम् ,भ्यः)
- णकार - नकारयोः निर्धारणम् - ( रामेण - रामेन , रामाणाम् - रामानाम्.... )
- सर्वनामशब्दप्रयोगे दोषः - (सा रामः, सः फलम् , तत् पुरुषः)
- समानसर्वनामशब्दभ्रमः - (ते रामाः - ते रमे, भवति के गुणाः - भवती कथम् अस्ति..... )
- विशिष्टशब्दरूपाणां प्रयोगभ्रमः- (दारा,सुखी,सुदामा,लक्ष्मीः,श्रीः......)
- विशिष्टधातु-रूपाणां प्रयोगभ्रमः - (गृह् - गृहीतुम् - ग्रहीतुम् ,गृहीष्यति- ग्रहीष्यति, ग्रहीतवान् - गृहीतवान्, रुद् - रुदति/रोदति - रोदिति, लिख् - लिखिष्यति - लेखिष्यति, मिल् - मिलिष्यति - मेलिष्यति, )
- कारकनिर्धारणदोषः (रामः ग्रन्थं पठति - रामेण ग्रन्थः पठ्यते )
- उपपदविभक्तिसम्बद्धदोषः (ग्रामम् अभितः पर्वताः सन्ति - ग्रामस्य अभितः पर्वताः सन्ति..... )
- क्रियापदसम्बद्धदोषः
  - पुरुषप्रयोगे - (त्वं गच्छति, अहं गच्छति..... )
  - कालनिर्धारणदोषः - (सः (गमिष्यति) गच्छति.....)
  - लकारप्रयोगे दोषः - (रमेश! तत्र (गच्छतु) गच्छेत्/गच्छति )
  - अनुसरणगतदोषः - (पठ् - पठति - गम् - गमति । लिख् - लिखति - दृश् - दृशति )
  - क्रियापदभ्रमः (परस्मैपद-आत्मनेपदी) - (करोति - क्रियते । गच्छति - गम्यते ।)
  - तकारान्तशब्दरूपसदृशपदभ्रमः - (भवति प्र.ए. - भवति स.वि.ए.व.,जगति......)
  - शतृप्रत्ययान्तशब्दरूपसदृशभ्रमः - (गच्छति प्र.ए. - गच्छति स.वि.ए.)
- अव्ययपदेषु भ्रमः - (शनैः - तृ.वि.बहु., इदानीम् द्वि.वि.ए.,अत्रतः - इतः, तत्रतः - ततः, उपरितः - उपरिष्टात्, बहिस्तात् - बहिर्भागतः )
- प्रत्ययसम्बद्धदोषः -
  - तव्यत् - पठ् - पठितव्यम् , गम् - गमितव्यम् । क्री - क्रीतव्यम् क्रेतव्यम्
  - अनीयर् - पठ् - पठनीयम् , भुज् - भुजनीयम् । ग्रन्थः पठनीयः - ग्रन्थः पठनीयम् ।
  - यत् - ल्यप् - प्रत्ययोः भ्रमः - (यत्) उपलभ्यम् , आलभ्यम् ।
  - क्यप् - यत् - प्रत्ययोः भ्रमः - (क्यप्) स्तुत्य,कृत्य ।
  - ण्यत् - यत् - प्रत्ययोः भ्रमः - (ण्यत्) कार्यम् , लभ्यम् ।
  - 'क्त' प्रत्ययस्य भ्रमः - पठ् - पठितः, गम् - (गमितः) गतः,मन् (मनितः)मतः ।

विशिष्टधातूनां प्रयोगः - ग्रह् - (ग्रहितः) ग्रहीतः,भिद् -(भिदितः) भिन्नः,
त्यज् (त्यजितः) त्यक्तः । वद् - (वदितः) उदितः ।

- वाक्यप्रयोगदोषः - रामः पुस्तकं पठितः - रामेण पुस्तकं पठितम् , तया भोजनं कृता ।.......
- क्तवतु - वतुप् - प्रत्ययभ्रमः - गतवान् (क्तवतु) - गुणवान् (वतुप्) ।
- शतृ - पठ् - पठत्, गम् - (गमत्) गच्छत् । गच्छत् ( गम् - शतृ- नपुं.,प्र.ए. गच्छत गम् लोट्.,म.पु.ब.)
- शानच्- मतुप् - प्रत्ययभ्रमः - भूमिमान् - गम्यमान् ।
- क्त्वा - चल् - चलित्वा, गम् - (गमित्वा) गत्वा । नम् - नत्वा, हस् – हसित्वा ।
- विशिष्टधातु-प्रयोगे - धा- (धात्वा)-हित्वा । हा-(हात्वा) हित्वा । हन्- (हनित्वा) हत्वा
- ल्यप् - चतुर्थीविभक्तेः भ्रमः - विहस्य ,विधाय ।
- तुमुन् - पठ् - (पठतुम् - पठितुम्) , कथ् - (कथितुम्) कथयितुम् । कृ - कृतुम् । वह् - (वहतुम् , वहितुम्) वोढुम्.......
- ण्वुल् - हन् - (हन्तकः - घातकः )

- विशेष्यविशेषणनिर्धारणे दोषः -
  लिङ्गप्रयोगे - राधा उत्तमः बालिका अस्ति ।
  वचनप्रयोगे - सज्जनः जनाः सदाचरणं कुर्वन्ति ।
  समानविभक्तिप्रयोगे - वीरः बालकेन जनाः रक्षिताः ।
- मकारलेखनम् - १. स्वरात् अनुस्वारलेखनम् - रामः गृहं आगतवान् । बालः फलं इच्छति ।
  २. अवसाने सति अनुस्वारलेखनम् - रामेण कार्यं कृतं । बालकेन चित्रं दृष्टं ।

- परसवर्णलेखनम् - अंगणम्- अङ्गणम्, चंचूः - चञ्चूः, अंडम् - अण्डम्, शांतः - शान्तः ........।
- द्वित्वे संशयः - महत्वम् - महत्त्वम्, सत्वम् - सत्त्वम्, उज्वलः - उज्ज्वलः, पाश्चात्यः - पाश्चात्त्यः, तज्ञः - तज्ज्ञः, छित्वा- छित्त्वा, उध्वस्तः - उद्ध्वस्तः ।
  दुस्थितिः - दुस्स्थितिः/दुःस्थितिः, मनस्थितिः - मनस्स्थितिः/मनःस्थितिः, निस्पृहः - निस्स्पृहः/निःस्पृहः,निस्वार्थः-निस्स्वार्थः/निःस्वार्थः,............. ।
- अनुस्वारलेखनम् - सन्यासी - संन्यासी, पुल्लिङ्गः - पुँल्लिङ्गः, पुंल्लिङ्गः - पुंलिङ्गः
- समासपदलेखनम् - नन्तरम् (न अन्तरम्) - अनन्तरम् (तद् नन्तरम् - तदनन्तरम् ) - उच्चारणदोषात् ।
- प्रादेशिकभाषाप्रभावः - १. ज्ञकारस्य 'ग्य' इति उच्चारणं लेखनञ्च । संग्या - संज्ञा । 'जज्ञोर्ज्ञः' इति कौमुद्यां स्पष्टीकृतम् ।
  २. ऋकारस्य 'रि,रु' इति उच्चारणं लेखनञ्च । रिग्वेदः / रुग्वेदः - ऋग्वेदः, शत्रु - शतृ....
  ३. टकारस्य 'ठ' इति उच्चारणम् । सङ्गठनम् - सङ्घटनम्
- धातोः अन्तिमवर्ण-लेखनम् - (बृहि - मनिन् = ब्रम्हा - ब्रह्मा ) (ह्लादी = आल्हादः - आह्लादः )

- 'स,श,ष' वर्णभ्रमः - **स्यालः - श्यालः, ष्मशानम् - श्मशानम् , श्यूतः - स्यूतः , निष्कर्शः - निष्कर्षः ।**
- अल्प-प्राणस्य महाप्राणस्य चोच्चारणम् - **प्रभोदनम् - प्रबोधनम् , भन्धनम् - बन्धनम् ,अघादः - अगाधः, सुधामः - सुदामः, फलितकेशः- पलितकेशः, पित्थम् - पित्तम्, कुष्टः-कुष्ठः .........।**
- लिङ्गनिर्धारणम् - नियतलिङ्गनिर्धारणे भ्रमः - **मित्रम् - (विनोदः मम मित्रः अस्ति । गौरी मम मित्रा अस्ति ।) वाहनम् - (सिंहः दुर्गायाः वाहनः । वृषभः शिवस्य वाहनः।)**
- लिङ्गनिर्धारणे भ्रमः - **तालुः - (पुं-नपुंस.) , मन - (पुं-नपुंस.), दाराः - (स्त्री- पुं) सुखी (स्त्री- पुं.) सन्धिः - (स्त्री- पुं.) ध्वनिः - (स्त्री- पुं.) महिमा (स्त्री- पुं.)......**
- वचननिर्धारणे - नित्यबहुवचनम् - **अक्षत - (अक्षतः - अक्षताः) , अप् - (अपः - आपः) दार -(दारः - दाराः)... चतुर् - (चतुरः - चत्वारः) दम्पती - (एकव.,-द्विव.,) ।**

*****